तप, ङ ञ दाहे। इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-उभंच-सकं-सेट्।) ङ, तपते। ञ, तपति तपते। अयमात्मनेपदीत्यन्ये। इति दुर्गादासः ॥

तप, औ }
तप, य ङ औ } दवैश्वर्य्ययोः। इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अकंच-अनिट्। दिवादिपक्षे आत्मं।) दव उपतापः। "तपति तनुगात्रि! मदनस्त्वाम्।" औ, अताप्सीत्। य ङ, तप्यते धनी ईश्वरः स्यादित्यर्थः। औ, अतप्त। दिवादिपक्षे ऐश्वर्य्य एव इत्यन्ये। इति दुर्गादासः ॥

तपः, [स्] क्ली, (तपति तापयति वा। तप उपतापे+"सर्व्वधातुभ्योऽसुन्।" उणां। ४।१८८। इति असुन्।) वैधक्लेशजनकं कर्म्म। यथा,—
"उमेऽतिचपला पुत्त्रि! न क्षमं तावकं वपुः।
सोढुं क्लेशस्वभावस्य तपसः सौम्यदर्शने ॥"
इति तिथ्यादितत्त्वे मत्स्यपुराणवचनम् ॥ * ॥
तत्फलं यथा,—
"तपोभिः प्राप्यतेऽभीष्टं नासाध्यं हि तपस्यतः।
दुर्भगत्वं वृथा लोको वहते सति साधने ॥"
इति च तत्रैव तद्वचनम् ॥ * ॥
अपि च। मरीचिरुवाच।
"ब्राह्मणस्य तपोमूलं यज्ञः स्वाध्याय एव च।
तस्मादग्ने! फलं ब्रूहि तपसोऽध्ययनस्य च ॥
वह्निरुवाच।
स्वाध्यायतपसोर्वक्ष्ये तन्मे निगदितं शृणु।
तपसो हि परं नास्ति तपसा विन्दते महत् ॥
तपसा क्षीयते पापं मोदते सह दैवतैः।
तपसा प्राप्यते स्वर्गस्तपसा प्राप्यते यशः ॥
तपसा सर्व्वमाप्नोति तपसा विन्दते परम्।
ज्ञानविज्ञानसम्पन्नः सौभाग्यं रूपमेव च ॥
तपसा लभते सर्व्वं तथैवाध्ययनेन च।
तस्मात् स्वधर्म्मसंयुक्तो नित्यं सिध्यति पण्डितः ॥
धर्म्मात् सुखमवाप्नोति इह लोके परत्र च ॥"
इत्याद्ये वह्निपुराणे नित्याह्निकस्नानविधिनामाध्यायः ॥ तपस्या। तत्त्रिविधम्। शारीरं वाचिकं मानसञ्च। यथा,—
"देवद्विजगुरुप्राज्ञपूजनं शौचमार्ज्जवम्।
ब्रह्मचर्य्यमहिंसा च शारीरं तप उच्यते ॥१॥
अनुद्वेगकरं वाक्यं सत्यं प्रियहितञ्च यत्।
स्वाध्यायाभ्यसनञ्चैव वाङ्मयं तप उच्यते ॥२॥
मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥"३॥
तदपि त्रिविधम्। सात्त्विकं राजसं तामसञ्च यथा,—
"श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥१॥
सत्कारमानपूजार्थं तपो दम्भेन चैव यत्।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥२॥
मूढग्राहेणात्मनो यत् पीडया क्रियते तपः।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥"३॥
इति श्रीभगवद्गीतायाम्। १७। १४—१६ ॥*॥

जनलोकादूर्द्ध्वलोकः। यथा,—
"अस्योपरि तपोलोकस्तेजोमय उदाहृतः।
वैराजा यत्र ते देवा वसेयुर्द्देवपूजिताः ॥
वासुदेवे मनो येषां वासुदेवेऽर्पितक्रियाः।
तपसा तोष्य गोविन्दमभिलाषविवर्ज्जिताः ॥
तं तपोलोकमासाद्य वसन्ति विजितेन्द्रियाः।
शिलोञ्छवृत्तयो ये वै दन्तोलूखलिकाश्च ये ॥
येऽश्मकुट्टाश्च मुनयः शीर्णपर्णाशिनश्च ये।
ग्रीष्मे पञ्चाग्नितपसो वर्षासु स्थण्डिलेशयाः ॥
हेमन्ते शिशिरे वा ये क्षिपन्ति सलिले क्षपाः।
कुशाग्रनीरबिन्दूंश्च तृषिता यतयोऽपिबन् ॥
वाताशिनोऽतिक्षुधिताः पादाङ्गुष्ठाग्रभूस्पृशः।
ऊर्द्ध्वहस्ता रविदृशस्त्वेकाङ्घ्रिस्थाननिश्चलाः ॥
ये वै दिवानिरुच्छ्वासा मासोच्छ्वासाश्च ये परे।
मासोपवासं कुर्व्वन्ति चातुर्म्मास्यव्रताश्च ये ॥
ऋत्वन्ते तोयपाना ये ये षण्मासोपवासकाः।
ये च वर्षानिमेषा वै वर्षधाराम्बुतर्षकाः ॥
स्थाणुसाम्योपसंप्राप्ता मृगकण्डूतिसौख्यदाः।
जटाटवीकोटरान्तः कृतनीडाण्डजाश्च ये ॥
प्ररूढवल्मिकाङ्गाश्च स्नायुनद्धास्थिसञ्चयाः।
लताप्रतानैः परितो वेष्टितावयवाश्च ये ॥
शस्यानि च प्ररूढानि यदङ्गेषु महीपते!।
इत्येतैर्न्नियमैर्य्ये तु क्लिष्टात्मानस्तपोधनाः ॥
ब्रह्मायुषस्तपोलोके ते वसन्त्यकुतोभयाः ॥"
इति पद्मपुराणम् ॥ * ॥
चान्द्रायणादिव्रतम्। धर्म्मः। इति मेदिनी। से, २४॥

तपः, पुं, (तपति तापयति वा। तप सन्तापे+पचाद्यच्।) ग्रीष्मः। इत्यमरः। १। ४। १९॥ (यथा, माघे। १। ६६।
"तपेन वर्षाः शरदा हिमागमो
वसन्तलक्ष्म्या शिशिरः समेत्य च।
प्रसूनकॢप्तिं दधतः सदर्त्तवः
पुरेऽस्य वास्तव्यकुटुम्बितां ययुः ॥")

तपःकरः, पुं, (तपः करोतीति। कृ+टः।) तपस्वी मत्स्यः। इति शब्दरत्नावली ॥ तपस्याकारके, त्रि ॥

तपःक्लेशसहः, त्रि, (तपसः क्लेशं सहते इति। सह+अच्।) दान्तः। इत्यमरः। २। ७।४३॥

तपःस्थली, स्त्री, (तपसः स्थली।) काशी। इति त्रिकाण्डशेषः ॥

तपती, छाया नाम सूर्य्यपत्नी। इति त्रिकाण्डशेषः ॥ सूर्य्यकन्या। सा पूरुवंशीयकृष्णराजपुत्त्रसम्बरणभार्य्या। इति श्रीभागवतम् ॥ (यथा, महाभारते। १। ९४। ४७।
"ततः सम्बरणात् सौरी सुषुवे तपती कुरुम् ॥"
अस्या विशेषविवरणादिकं तत्रैव १७२ अध्याये द्रष्टव्यम् ॥)

तपनः, पुं, (तपतीति। तप+कर्त्तरि ल्युः।) सूर्य्यः। (यथा, महाभारते। ३। ३। ६२।
"सहस्ररश्मिरादित्यस्तपनस्त्वं गवां पतिः ॥")
भल्लातकवृक्षः। अग्न्यादिदाहात्मकनरकः ॥ ग्रीष्मः। इति हेमचन्द्रः ॥ तापः। इति धरणिः ॥ अर्कवृक्षः। क्षुद्राग्निमन्थवृक्षः। सूर्य्यकान्तमणिः। इति राजनिर्घण्टः ॥ (यथा, आर्य्यासप्तशत्याम्। २६।
"अनयनपथे प्रिये! न यथा यथा दृश्य एव
दुष्प्रापे।
ज्ञानेव केवलं निशि तपनशिला वासरे ज्वलति ॥")
अग्निविशेषः। यथा, हरिवंशे। १७८। ३१।
"ते जातवेदसः सर्व्वे कल्माषः कुसुमस्तथा।
दहनः शोषणश्चैव तपनश्च महाबलः ॥"
स्त्रीणां सत्त्वजे अलङ्कारविशेषे, क्ली। तल्लक्षणं यथा साहित्यदर्पणे। ३। ११६।
"तपनं प्रियविच्छेदे स्मरावेशोत्थचेष्टितम् ॥"
उदाहरणं यथा, तत्रैव,—
"श्वासान्मुञ्चति भूतले विलुठति त्वन्मार्गमालोकते
दीर्घं रोदिति विक्षिपत्यत इतः क्षामां भुजा-
वल्लरीम्।
किञ्च प्राणसमानकाङ्क्षितवती स्वप्नेऽपि ते
सङ्गमं
निद्रां वाञ्छति न प्रयच्छति पुनर्द्दग्धो विधि-
स्तामपि ॥")

तपनच्छदः, पुं, (तपनः अतिरूक्षच्छदो यस्य।) आदित्यपत्रवृक्षः। इति राजनिर्घण्टः ॥

तपनतनया, स्त्री, (तपनस्तापको वह्निस्तनयो यस्याः। वह्निगर्भत्वादस्यास्तथात्वम्।) शमीवृक्षः। (तपनस्य सूर्य्यस्य तनया।) यमुना। इति राजनिर्घण्टः ॥

तपनमणिः, पुं, (तपनः सूर्य्यस्तत्प्रियो मणिः।) सूर्य्यकान्तमणिः। इति राजनिर्घण्टः ॥

तपनात्मजा, स्त्री, (तपनस्य सूर्य्यस्य आत्मजा कन्या।) गोदावरी नदी। इति हेमचन्द्रः ॥ यमुना च ॥

तपनी, स्त्री, (तपनः सूर्य्यो जनकतयास्त्यस्या इति अच्। ततो गौरादित्वात् ङीष्।) गोदावरी। इति हेमचन्द्रः ॥

तपनीयं, क्ली, (तप+अनीयर्। वह्नौ शोधनीयपरीक्षणीयत्वादस्य तथात्वम्।) स्वर्णम्। इत्यमरः। २। ९। ९४ ॥ (यथा, रघुः। १८।४१।
"तस्मादधः किञ्चिदिवावतीर्णा-
वसंस्पृशन्तौ तपनीयपीठम् ॥")

तपनीयकं, क्ली, (तपनीय+स्वार्थे कन्।) सुवर्णम्। इति राजनिर्घण्टः ॥

तपनेष्टं, क्ली, (तपनस्य सूर्य्यस्य इष्टम्। सूर्य्यप्रियत्वादस्य तथात्वम्।) ताम्रम्। इति राजनिर्घण्टः ॥

तपसः, पुं, (तपतीति। तप+"अत्यविचमितमीति।" उणां। ३। ११७। इति असच्।) चन्द्रः। इति त्रिकाण्डशेषः ॥ पक्षी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

तपस्तक्षः, पुं, (तपस्तपस्यां तक्षति तनूकरोतीति। तक्ष तनूकरणे+अण्। सर्व्वैश्वर्य्यादिप्रेरणेन तपस्विनां तपोविघ्नकरणादस्य तथात्वम्।) इन्द्रः। इति हेमचन्द्रः। २। ८७ ॥